# Kaveri Stuti

# कावेरीस्तुतिः

## Document Information

Text title : Kaveri Stuti

File name : kAverIstutiH.itx

Category : devii, vAsudevAnanda-sarasvatI, devI, nadI

Location : doc_devii

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# कावेरीस्तुतिः

कावेरी निम्नगा वारिलहरीपापहारिणी ।
तारिणी पापिनामेनां भजेऽहं पापहारिणीम् ॥ १॥

स्वसा कृष्णानद्यास्त्रिजगदनवद्यामितगुणा ।
स्वसाराद्यावद्यामखिलमलपद्यामतिघृणा ॥

नृणां गोम्र्याच्छाद्य दरमसृतपद्यां हितकरीम् ।
व्यधात्सा कावेरी सरिदवतु नः पुण्यलहरू ॥ २॥

उदीचीस्था गङ्गा पृथुतरतरङ्गातिकपटा ।
भटान्याम्यानुच्चैर्दरकरगिरा या जयति हि ॥

इयं कावेरी तु प्रसभमपि तानन्तिकगतान्नि
वत्र्य स्वर्लोकं नयति निजलोकं श्रुतिमता ॥ ३॥

अतो जल्पं जल्पं सरिदमृतकल्पं तव यश-।
स्तटे भ्रामं भ्रामं तव खलु निकामं शुचि यशः ॥

मुदा मज्जं मज्जं तव पयसि जन्माद्यकहरम् ।
सदा स्मारं स्मारं तव भवहमाहात्म्यमवरम् ॥ ४॥

अये कावेरि त्वत्तटसमटनादेवमनिशम् ।
नयेत्कालं मेलं तव किल जलं पुण्यधुनि शम् ।
तटे श्वोतारण्यप्रभृतिवरकाशीसदृशषण्-।
महाक्षेत्राण्यन्यान्यपि तव जयन्त्याधिविलये ॥ ५॥

कावेरि सिन्धो ननु दीनबन्धो
कारुण्यसिन्धो भवघोरसिन्धोः ।
मां तारय त्वं पतितोऽग्रतस्ते
तत्राप्यपेक्षार्हति साध्विनस्ते ॥ ६॥

पतितोद्धरणाय साध्वि चेद
वतारस्तव भूतले न चेत् ।
पतितं हि समुद्धरिष्यसि
स्वजनुस्त्वं विफलं करिष्यसि ॥ ७॥

कृच्छ्रादिकव्रतमिहाचरणीयमग्रे
नेप्येथ सद्गतिमितीच्छसि चेत्त्वदग्रे ।
वच्मि प्रसह्य खलु सह्यसुते पुनासि
त्वं सह्य इत्यृषिवचो विमतं करोषि ॥ ८॥

दीक्षा गृहीताजगरी गरीयसी
यद्बोधसि श्रीगुरुणारुणाभसा ।
कायाधवायापि मुदर्पितास्तुवत्
कावेरिकां तां खलु वासुदेवः ॥ ९॥

इति श्रीवासुदेवानन्दसरस्वतीविरचिता कावेरीस्तुतिः समाप्ता ।

*Kaveri Stuti*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*